रघुवंशः

रघुवंश महाकाव्यम्

महाकवि कालिदासः कृत।

पत्र - 36

1040

लिखित

11"X6"

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

रघुवंशकाव्यस° ॥श्रीगणेशाय नमः॥ वागर्थाविवसंपृक्तौवागर्थप्रतिपत्तये जगतःपितरौवं
१ देपार्वतीपरमेश्वरौ १ क्वसूर्यप्रभवोवंशः क्वचाल्पविषयामतिः तितीर्षुर्दुस्त
रंमोहादुडुपेनास्मिसागरं २ मंदःकवियशःप्रार्थीगमिष्याम्युपहास्यतां प्रा
शुलभ्येफलेमोहादुद्बाहुरिववामनः ३ अथवाकृतवाग्द्वारेवंशेस्मिन्पूर्व
सूरिभिः मणौवज्रसमुत्कीर्णेसूत्रस्येवास्तिमेगतिः ४ सोहमाजन्मशुद्धा
नामाफलोदयकर्मणां आसमुद्रक्षितीशानां आनाकरथवर्त्मनां ५ य
थाविधिहुताग्नीनांयथाकामार्चितार्थिनां यथापराधदंडानां यथाकाल
प्रबोधिनां ६ त्यागायसंभृतार्थानांसत्यायमितभाषिणां यशसेविजि रामः १

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

षूणांप्रजायैगृहमेधिनां ७ शैशवेभ्यस्तविद्यानांयौवनेविषयैषिणां वार्द्ध
केमुनिवृत्तीनांयोगेनांतेतनुत्यजां ८ रघूणामन्वयंवक्ष्येतनुवाग्विभवोपि
सन् तद्गुणैः कर्णमागत्यचापलायप्रचोदितः ९ तंसंतः श्रोतुमर्हंति
सदसद्व्यक्तिहेतवः हेम्नः संलक्ष्यतेह्यग्नौविशुद्धिः श्यामिकापिवा १० वैव
स्वतोमनुर्नामः माननीयोमनीषिणां आसीन्महीक्षितामाद्यः प्रणवश्छंद
सामिवः ११ तदन्वयेशुद्धिमतिप्रसूतः शुद्धिमत्तरः दिलीपइतिराजेंदुरिंदुः क्षी
रनिधाविव १२ व्यूढोरस्कोवृषस्कंधः शालप्रांशुर्महाभुजः आत्मकर्म
क्षमंदेहंक्षात्रोधर्मइवाश्रितः १३ सर्वातिरिक्तसारेणसर्वतेजोभिभावि

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

नो स्थितः सर्वान्नतेनोर्वी क्रांत्वा मेरुरिवात्मना १४ आकारसदृशप्र
ज्ञः प्रज्ञयासदृशागमः आगमैः सदृशारंभः आरंभसदृशोदयः १५ भीमकां
तैर्नृपगुणैः स बभूवोपजीविनां अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्ण
वः १६ रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परं न व्यतीयुः प्रजास्तस्य
नियंतुर्नेमिवृत्तयः १७ प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् सह
गुणमुत्स्रष्टुमादत्ते हि रसं रविः १८ सेनापरिच्छदस्तस्य द्वयमेवार्थसाधनं
शास्त्रेष्वकुंठिता बुद्धिः मौर्वी धनुषि चातता १९ तस्य संवृतमंत्रस्य गूढा
कारेंगितस्य च फलानुमेयाः प्रारंभाः संस्काराः प्राक्तना इव २० जुगो

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

येस्वभुजादवतारिता तेनधूर्जगतोगुर्वीसचिवेषुनिचिक्षिपे ३४ ॥ अथा
भ्यर्च्यविधातारंप्रयतौपुत्रकाम्यया तौदंपतीवसिष्ठस्यगुरोर्जग्मतुरा
श्रमं ३५ स्निग्धगंभीरनिर्घोषमेकस्यंदनमास्थितौ प्रावृषेण्यंपयोवाहं
विद्युदैरावताविव ३६ माभूदाश्रमपीडेतिपरिमेयपुरस्सरौ ॥ अनुभाववि
शेषात्तुसेनापरिवृताविव ३७ सेव्यमानौसुखस्पर्शैःशालनिर्यासगंधि
भिः पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः ३८ मनोभिरामाःशृण्वंतौरथने मि
मिस्वनोन्मुखैः षड्जसंवादिनीःकेकाद्विधाभिन्नाःशिखंडिभिः ३९ परस्परा
क्षिसादृश्यमदूरोज्झितवर्त्मसु मृगद्वंद्वेषुपश्यंतौस्यंदनाबद्धदृष्टिषु ४०

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

रघुवंश० ४

श्रेणीबंधाद्वितन्वद्भिरस्तंभां तोरणस्रजं सारसैः कलनिर्ह्रादैः
क्वचिदुन्नमिताननौ ४१ पवनस्यानुकूलत्वात्प्रार्थनासिद्धिसंसिनः रजो
भिस्तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ ४२ ग्रामेष्वात्मविसृष्टेषु यूपचिह्नेषु
यज्वनां अमोघाः प्रतिगृह्णंतावर्घ्यानुपदमाशिषः ४४ हैयंगवीनमादाय
घोषवृद्धानुपस्थितान् नामधेयानि पृच्छंतौ वन्यानां मार्गशाखिनां ४५
सरसीष्वरविंदानां वीचिविक्षोभशीतलं आमोदमुपजिघ्रंतौ स्वनिश्वासा
नुकारिणं ४६ एकादशभिः कुलकम् ११ काप्यभिख्या तयोरासीद्व्रजतोः
शुद्धवेषयोः हिमनिर्मुक्तयोर्योगे चित्राचंद्रमसोरिव ४७ तत्तद्भूमिपतिः ४ राम:

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

पत्रैर्दर्शयन्तौ प्रियदर्शनौ ॥ अपि लंघितमध्वानं बुबुधे न बुधोपमः ॥४८॥ स
दुःप्रापयशाः प्रापदाश्रमं श्रांतवाहनः ॥ सायं संयमिनस्तस्य महर्षेर्महिषी
सखः ॥४९॥ वनांतरादुपावृत्तैः स्कंधासक्तसमित्कुशैः ॥ अग्निप्रत्युद्गमात्पूतैः
पूर्यमाणं तपस्विभिः ॥५०॥ आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः ॥ अप
त्यैरिव नीवारभागधेयोचितैर्मृगैः ॥५१॥ आकीर्यमाणमासन्नविधिभिः
समिदाहरैः ॥ वैखानसैरहरहपाग्निप्रत्युज्जमनचलितभिः ॥५२॥ सेकांते मुनि
कन्याभिः तत्क्षणोज्झितवृक्षकं ॥ विश्वासाय विहंगानां आलवालां
बुपायिनां ॥५३॥ आतपात्ययसंक्षिप्तनीवारासु निषादिभिः ॥ मृगैर्वर्तित

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

रघु०
५

रोमंथमुटजांगणभूमिषु ५४ ॥ अभ्युत्थिताग्निपिशुनैरतिथीनाश्रमो
न्मुखान् पुनानं पवनोध्दूतैर्धूमैराहुतिगंधिभिः ५५ षड्भिरादिकुल
नू. कं ६ ॥ अथयंतारमादिश्यधूर्यान्विश्रामयेतिसः तामवारोपयत्पत्नीं
रथादवरुरोहच ५६ तस्मैसभ्याःसभार्यायगोप्त्रेगुप्ततमेंद्रियाः ॥ अ
र्हणामर्हतेचक्रुर्मुनयोनयचक्षुषे ५६ विधेःसायंतनस्यांतेसदद
र्शतपोनिधिं ॥ अन्वासितमरुंधत्यास्वाहयेवहविर्भुजं ५७ तयोर्जगृ
हतुःपादान्राजाराज्ञीचमागधी तौगुरुर्गुरुपत्नीचप्रीत्याप्रतिन
नंदतुः ५८ तमातिथ्यक्रियाशांतरथक्षोभपरिश्रमं पप्रच्छकुशलंरा ५

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

ज्ये राज्याश्रममुनिंमुनिः ५९ अथाथर्वनिधेस्तस्यविजितारिपुरःपुरः
अर्थ्यामर्थपतिर्वाचमाददेवदतांवरः ६० उपपन्नंननुशिवंसप्तस्वंगेषु
यस्यमे दैवीनांमानुषीणांचप्रतिहर्तात्वमापदां ६१ तवमंत्रकृतोमंत्रैर्दू
रात्संशमितारिभिः प्रत्यादिश्यंतइवमेदृष्टलक्ष्यभिदःशराः ६२ हविराव
र्जितंहोतस्त्वयाविधिवदग्निषु वृष्टिर्भवतिसस्यानामवग्रहविशोषिणां
६३ पुरुषायुषजीविन्योनिरातंकानिरीतयः यन्मदीयाःप्रजास्तस्यहेतुस्त्व
द्ब्रह्मवर्चसं ६४ त्वयैवंचिंतमानस्यगुरुणाब्रह्मयोनिना सानुबंधाःक
थंनस्युःसंपदोमेनिरापदः ६५ किंतुवध्वांतवैतस्यामदृष्टसदृशप्रजं ने

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मामवतिसद्वीपाःरत्नसूरपिमेदिनी ६७ मत्परंदुर्लभंमत्वानूनमाव
र्जितंमयापयःपूर्वैःस्वनिस्वासैःकवोष्णमुपभुंजते ६८ नूनंमत्तःपरं
वंश्याःपिंडविछेददर्शिनःनप्रकामभुजःश्राद्धेस्वधासंग्रहतत्पराः ६९ सो
हमिज्याविशुद्धात्माप्रजालोपनिमीलितःप्रकाशश्चांधकारश्चलोका
लोकइवाचलः ७० लोकांतरसुखंपुण्यंतपोदानसमुद्भवं संततिःशुद्ध
वंश्याहिपरत्रेहचशर्मणे ७१ तयाहीनंविधातर्मांकथंपश्यन्नदूयसे
सिक्तंस्वयमिवस्नेहाद् वंध्यमाश्रमवृक्षकं ७२ असह्यपीडंभगवन्नृ
णमंत्यमवेहिमे अरुंतुदमिवालानमनिर्वाणस्यदंतिनः ७३ तस्मात्मुच्ये ६

व

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

यथातातसंविधातुंतथार्हसि इक्ष्वाकूणांदुरापेर्थेत्वदधीनाहिसिद्धयः

७४ इतिविज्ञापितोराज्ञाध्यानस्तिमितलोचनः क्षणमात्रमृषिस्तस्थौसु

प्तमीनइवह्रदः ७५ सोऽपश्यत्प्रणिधानेनसंततेःस्तंभकारणं भावितात्

माभुवोभर्तुरथैनंप्रत्यबोधयत् ७६ पुराशक्रमुपस्थायतवोर्वींप्र

तियास्यतः आसीत्कल्पतरुच्छायामाश्रितासुरभिःपथि ७७ इमांदेवी

मृतुस्नातांस्मृत्वासपदिसत्वरः प्रदक्षिणक्रियातीतस्तस्याःकोपम

जीजनः ७८ धर्मलोपभयाद्राज्ञीमिमांसंचिंत्यसत्वरः प्रदक्षिणाक्रि

यार्हायांतस्यांत्वंसाधुनाचरः ७९ अवजानासिमांयस्मादतस्तेनभ

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

विष्यति मत्प्रसूतिमनाराध्यप्रजेतित्वांशशापसा ८० सशापोनत्वयारा
जन्नचसारथिनाश्रुतः नदत्याकाशगंगायाश्रोतस्युद्दामदिग्गजे ८१
ईप्सितंतदवज्ञानाद्विद्धिसार्गलमात्मनः प्रतिबध्नातिहिश्रेयः पूज्यपू
जाव्यतिक्रमः ८२ हविषेदीर्घसत्रस्यसाचेदानींप्रचेतसः भुजंगपिहि
तद्वारंपातालमधितिष्ठति ८३ सत्वमेकांतरांतस्यामदीयांवत्समात
रं आराधयसपत्नीकः सावांकामंविधास्यति ८४ इतिवादिनएवास्य
होतुराहुतिसाधनं अनिंद्यानंदिनीनामधेनुराववृतेवनात् ८५ ल
लाटोदयमाभुग्नंपल्लवस्निग्धपाटला बिभ्रतीश्वेतरोमांकंसंध्ये

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

वेशग्निनेनवे ८६ भुवंकोष्णेन कुंडोध्नी मेध्येनावभृथादपि प्रस्र
वेणाभिवर्षंती वत्सालोकप्रवर्त्तिना ८७ रजःकणैः खुरोद्धूतैः स्पृश
द्भिर्गात्रमंतिकात् तीर्थाभिषेकजां शुद्धिमादधाना महीपतेः ८८ तां पु
ण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोनिधिः याज्यमाशंसितावंध्यप्रार्थनं पु
नरब्रवीत् ८९ अदूरवर्त्तिनीं सिद्धिं राजन्विगणयात्मनः उपस्थिते
यं कल्याणी नाम्नि कीर्त्तित एव यत् ९० वन्यवृत्तिरिमां शश्वदात्मानु
गमनेन गां विद्यामभ्यसनेनेव प्रसादयितुमर्हसि ९१ प्रस्थितायां प्र
तिष्ठेथाः स्थितायां स्थितिमाचरेः निषण्णायां निषीदास्यां पीतांभसि पिबे

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

रघु०
८

स्येः ९२ वधूर्भक्तिमतीचैनामर्चितामातपोवनात् प्रयताप्रातरन्वेतु
सायंप्रत्युद्व्रजेदपि ९३ इत्याप्रसादादस्यास्त्वंपरिचर्यापरोभव अवि
घ्नमस्तुतेस्थेयाः पितेवधुरिपुत्रिणां ९४ तथेतिप्रतिजग्राहप्रीतिमान्स
परिग्रहः आदेशंदेशकालज्ञः शिष्यःशासितुरानतः ९५ अथप्रदो
षेदोषज्ञःसंवेशायविशांपतिं सूनुःसूनृतवाक्स्रष्टुर्विससर्जोर्जित
(क॰ल्पः स्था [illegible] न्याय प्रयोगे ब्रह्मदिनविधौ)
श्रियं ९६ सत्यामपितपःसिद्धौनियमापेक्षयामुनिः कल्पवित्कल्पया
मासवन्यामेवास्यसंविधां ९७ निर्दिष्टांकुलपतिनासपर्णशालाम
ध्यास्यप्रयतपरिग्रहद्वितीयःतच्छिष्याध्ययननिवेदितावसानांसंवि ८

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

ष्टः कुशश्यायपर्णे निशां निनाय १०० इति श्रीरघुवंशे महाकाव्ये काली
दासकृतौ वशिष्ठाश्रमगमनो नाम प्रथमः सर्गः १ अथ प्रजानामधिपः
प्रभाते जायाप्रतिग्राहितगंधमाल्यां वनाय पीतप्रतिबद्धवत्सां यशो
ध नोधेनुमृषेर्मुमोच १ तस्याः खुरन्यासपवित्रपांसुमपांसुलानां धुरि कीर्तनी
या मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत् २ निवर्त्य राजा द
यितां दयालुस्तां सौरभेयीं सुरभिर्यशोभिः पयोधरीभूतचतुःसमुद्रां जुगोप
गोरूपधरामिवोर्वी ३ व्रताय तेनानुचरेण धेनोर्न्यषेधि शेषोप्यनुयायिवर्गः
त नचान्यतस्तस्य शरीररक्षा स्ववीर्यगुप्ता हि मनोः प्रसूतिः ४ आस्वादवद्भिः कव

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

रघुवं० ९

लैस्तृणानां कंडूयनैर्दंशनिवारणैश्च। अव्याहतस्वैरगतैः स तस्याः सम्राट् समारा
धनतत्परोऽभूत् ५ स न्यस्तचिह्नामपि राजलक्ष्मीं तेजोविशेषानुमितां दधा
नः आसीदनाविष्कृतदानराजीरंतर्मदावस्थ इव द्विपेंद्रः ६ स्थितः स्थिताम
च्चलितः प्रयातां निषेदुषीमासनबंधधीरः जलाभिलाषी जलमाददानां छाये
व तां भूपतिरन्वगच्छत् ७ लताप्रतानोद्ग्रथितैः [उपलक्षितः] स केशैरधिज्यधन्वा विचचार
दावं रक्षापदेशान्मुनिहोमधेनोर्वन्यान्विनेष्यन्निव दुष्टसत्वान् ८ विसृष्ट
पार्श्वानुचरस्य तस्य पार्श्वद्रुमाः पाशभृता समस्य उदीरयामासुरिवोन्मदा
नामालोकशब्दं वयसां विरावैः ९ मरुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमा ९

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

रादेभिवर्त्तमानं अवाकिरन्बाललताः प्रसूनैराचारलाजैरिव पौरकन्याः १०
धनुर्भृतोप्यस्य दयार्द्रभावमाख्यातमंतःकरणैर्विशंकैः विलोकयंत्यो वपुरापु
रक्ष्णां प्रकामविस्तारफलं हरिण्यः ११ स कीचकैर्मारुतपूर्णरंध्रैः कूजद्भिरापादि
तवंशकृत्यं शुश्राव कुंजेषु यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः १२ पृक्त
स्तुषारैर्गिरिनिर्झराणामनोकहाकंपितपुष्पगंधिः तमातपक्लांतमनातप
त्रमाचारपूतं पवनः सिषेवे १३ शशाम वृष्ट्यापि विना दवाग्निरासीद्विशेषात्फ
लपुष्पवृद्धिः ऊनं न सत्वेष्वधिको बबाधे तस्मिन्वनं गोप्तरि गाहमाने १४

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

संचारपूतानिदिगंतराणिकृत्वादिनांतेनिलयायगंतुं प्रचक्रमेपल्लवरागताम्रा
प्रभापतंगस्यमुनेश्चधेनुः १५ तांदेवतापित्रतिथिक्रियार्थामन्वग्ययौमध्य
मलोकपालः बभौचसातेनसतांमतेनश्रद्धेवसाक्षाद्विधिनोपपन्ना १६ स
पल्वलोत्तीर्णवराहयूथान्यावासवृक्षोन्मुखबर्हिणानि ययौमृगाध्यासित
शाद्वलानिश्यामायमानानिवनानिपश्यन् १७ आपीनभारोद्वहनप्रयत्ना
द्गृष्टिर्गुरुत्वाद्वपुषोनरेंद्रः उभावलंचक्रतुरंचिताभ्यांतपोवनावृत्तिपथंगता
भ्यां १८ वसिष्ठधेनोरनुयायिनंतमावर्त्तमानंवनितावनांतात् पपौनिमे

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

षालसपक्ष्मपंक्तिरुपोषिताभ्यामिव लोचनाभ्यां १९ पुरस्कृता वर्त्मनि पार्थि-
वेन प्रत्युद्गता पार्थिवधर्मपत्न्या। तदंतरे सा विरराज धेनुर्दिनक्षपामध्यगतेव
संध्या २० प्रदक्षिणीकृत्य पयस्विनीं तां सुदक्षिणा साक्षतपात्रहस्ता प्रणम्य चान-
र्च विशालमस्याः शृंगांतरं द्वारमिवार्थसिद्धेः २१ वत्सोत्सुकापि स्तिमिता सपर्यां प्र-
त्यग्रहीत्सेति ननंदतुस्तौ। भक्त्योपपन्नेषु हि तद्विधानां प्रसादचिह्नानि पुरःफला-
नि २२ गुरोः सदारस्य निपीड्य पादौ समाप्य सांध्यं च विधिं दिलीपः। दोहावसाने
पुनरेव दोग्ध्रीं भेजे भुजोच्छिन्नरिपुर्निषण्णां २३ तामंतिकन्यस्तबलिप्रदी-

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

पामन्वास्यगोप्तागृहिणीसहायः। क्रमेणसुप्तामनुसंविवेशसुप्तोत्थितांप्रात
रनूदतिष्ठत्॥२४॥ इत्थंव्रतंधारयतःप्रजार्थंसमंमहिष्यामहनीयकीर्तेः सप्त
व्यतीयुस्त्रिगुणानितस्यदिनानिदीनोद्धरणोचितस्य॥२५॥ अन्येद्युरात्मानुचरस्यभा
वंजिज्ञासमानामुनिहोमधेनुः गंगाप्रपातांतविरूढशष्पंगौरीगुरोर्गह्वरमावि
वेश॥२६॥ सादुष्प्रधर्षामनसापिहिंस्रैरित्यद्रिशोभाप्रहितेक्षणेन॥ अलक्षिता
भ्युत्पतनोनृपेणप्रसह्यसिंहःकिलतांचकर्ष॥२७॥ तदीयमाक्रंदितमार्तसा धो
र्गुहानिबद्धप्रतिशब्ददीर्घं रश्मिष्विवादायनगेंद्रसक्तांनिवर्तयामास

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

नृपस्यदृष्टिं २८ सपाटलायांगवितस्थिवांसंधनुर्द्धरःकेशरिणंददर्शअधि
त्यकायामिवधातुमय्यांलोध्रद्रुमंसानुमतःप्रफुल्लं २९ वामेतरस्तस्यकरः
प्रहर्तुःनखप्रभाभूषितकंकपत्रे सक्तांगुलिःसायकपुंखएवचित्रार्पितारंभ
इवावतस्थे ३० ततोमृगेंद्रस्यमृगेंद्रगामीवधायवध्यस्यशरंशरण्यःजाताभि
षंगोनृपतिर्निषंगादुद्धर्तुमैच्छत्प्रसभोद्धृतारिः ३१ बाहुप्रतिष्टंभविवृद्धमन्यु
रभ्यर्णमागस्कृतमस्पृशद्भिः राजास्वतेजोभिरदह्यतांतर्भोगीवमंत्रौषधिरुद्धवी
र्यः ३२ तमार्यगृह्यंनिगृहीतधेनुर्मनुष्यवाचामनुवंशकेतुं ॥ विस्मापयन्वि

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

स्मितमात्मवृत्तौभूपालसिंहंनिजगादसिंहः ३३ अलंमहीपालतवश्रमेण
प्रयुक्तमप्यस्त्रमितोवृथास्यात् नपादपोन्मूलनशक्तिरंहः शिलोच्चयेमूर्छतिमारुत
स्य ३४ कैलासगौरंवृषमारुरुक्षोःपादार्पणानुग्रहपूतपृष्ठं अवेहिमांकिंकर
मष्टमूर्तेः कुंभोदरंनामनिकुंभतुल्यं ३५ अमुंपुरःपश्यसिदेवदारुंपुत्रीकृतो
सौवृषभध्वजेन योहेमकुंभस्तननिस्सृतानांस्कंदस्यमातुःपयसांरसज्ञः ३६
कंडूयमानेनकटंकदाचित्वन्यद्विपेनोन्मथितात्वगस्य अथैनमद्रेस्तनयाशु
शोचसेनान्यमालीढमिवासुरास्त्रैः ३७ तदाप्रभृत्येववनद्विपानां

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

त्रासार्थमस्मिन्नहमद्रिकुक्षौ व्यापारितः शूलभृता विधाय सिंहत्वमङ्कागतस
त्त्ववृत्तिः ३८ तस्यालमेषा क्षुधितस्य तृप्त्यै प्रदिष्टकाला परमेश्वरेण उपस्थिता
शोणितपारणा मे सुरद्विषश्चान्द्रमसी सुधेव ३९ स त्वं निवर्तस्व विहाय लज्जां गु
रोर्भवान्दर्शितशिष्यभक्तिः शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद्यशः शस्त्रभृतां क्षि
णोति ४० इति प्रगल्भं पुरुषाधिराजो मृगाधिराजस्य वचो निशम्य प्रत्याहतास्त्रो
गिरिशप्रभावादात्मन्यवज्ञां शिथिलीचकार ४१ प्रत्यब्रवीच्चैनमिषुप्रयोगे त
त्पूर्वभङ्गे वितथप्रयत्नः जडीकृतस्त्र्यम्बकवीक्षणेन वज्रं मुमुक्षन्निव वज्रपाणिः

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

॥ ५२ संरुद्धचेष्टस्य मृगेंद्र कामं हास्यं वचस्तद्यदहं विवक्षुः अंतर्गतं प्राणभृ
तां हि वेद सर्वं भवान्भावमतोभिधास्ये ॥ ५३ मान्यः स मे स्थावरजंगमानां सर्गस्थि
तिप्रत्यवहारहेतुः गुरोरपीदं धनमाहिताग्नेर्नश्यत्पुरस्तादनुपेक्षणीयं ॥ ५४ स त्वं
मदीयेन शरीरवृत्तिं देहेन निर्वर्त्तयितुं प्रसीद दिनावसानोत्सुकबालवत्सा विसृ
ज्यतां धेनुरियं महर्षेः ॥ ५५ अथांधकारं गिरिकंदराणां दंष्ट्रामयूखैः शकलानि कु र्वे:
र्वन् भूयः स भूतेश्वरपार्श्ववर्ती किंचिद्विहस्यार्थपतिं बभाषे ॥ ५६ एकातपत्रं ज
गतः प्रभुत्वं नवं वयः कांतमिदं वपुश्च अल्पस्य हेतोर्बहु हातुमिच्छन् विचार २३

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मुदप्रतिभासिमेत्वं ४७ प्रतानुकंपातवचेहिपंगौरिकाभवेत्स्वस्तिमतीत्वदंते
जीवन्तपुनः श्रम्बुपल्लवेभ्यः प्रजाप्रजानाथपितेवपासि ४८ अथैकधेनोरप
राधदंडात्गुरोःकृशानुप्रतिमाद्दिभेषि शक्योस्पमन्युर्भवताविनेतुंगाः कोटि
शः स्पर्शयताघटोध्नीः ४९ तद्रक्षकल्याणपरंपराणांभोक्तारमूर्जस्वलमा
त्मदेहं महीतलस्पर्शनमात्रभिन्नमृद्धंहिराज्यंपदमैंद्रमाहुः ५० एतावदु
क्त्वाविरतेमृगेंद्रेप्रतिस्वनेनास्यगुहागतेन शिलोच्चयोपिक्षितिपालमुच्चैः प्रीत्या
तमेवार्थमभाषतेव ५१ निशम्यदेवानुचरस्यवाचंमनुष्यदेवपुनरप्युवा

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

च धेन्वातदध्यासितकातराक्ष्यानिरीक्ष्यमाणःसुतरांदयालुः ५२ क्षतात्किलै
त्रायतइत्युदग्रः क्षत्रस्यशब्दोभुवनेषुरूढः राज्येनकिंतद्विपरीतवृत्तेः प्राणै
रुपक्रोशमलीमसैर्वा ५३ कथंनुशक्योनुनयोमहर्षेर्विश्राणनाच्चान्यपयस्विनी
नां इमामनूनांसुरभेरवेहिरुद्रौजसातुप्रहृतंत्वयास्यां ५४ सेयंस्वदेहार्पणनिः
प्यो ष्क्रयेणन्याय्यामयामोचयितुंभवत्तः नपारणास्याद्विहतातवैवंभवेदलुप्तश्चमु
नेः क्रियार्थः ५५ भवानपीदंपरवानवैतिमहान्हियत्नस्तवदेवदारौ स्थातुंनि
योक्तुर्नहिशक्यमग्रे विनाश्यरक्ष्यंस्वयमक्षतेन ५६ किमप्यहिंस्यस्तवचेन्मतो

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

ख

हंयशःशरीरेभवमेदयालुः एकांतविध्वंसिषुमद्विधानांपिंडेष्वनास्था खलुभौति
केषु ५७ संबंधमाभाषणपूर्वमाहुर्वृत्तःसनौसंगतयोर्वनांते तद्भूतनाथानु
गनार्हसित्वंसंबंधिनोमेप्रणयंविहंतुं ५८ तथेतिगामुक्तवतेदिलीपःसद्यःप्रति
ष्टंभविमुक्तबाहुः सन्यस्तशस्त्रोहरयेस्वदेहमुपाहरत्पिंडमिवामिषस्य ५९ त
स्मिन्क्षणेपालयितुःप्रजानामुत्पश्यतःसिंहनिपातमुग्रं अधोमुखस्योपरिपु
ष्पवृष्टिःपपातविद्याधरहस्तमुक्ता ६० उत्तिष्ठवत्सेत्यमृतायमानंवचोनिश
म्योत्थितमुत्थितःसन् ददर्शराजाजननीमिवस्वांगामग्रतःप्रस्रविणींनसिंहं ६१

त्थि त्थि

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

 तंविस्मितंधेनुरुवाचसाधोमायांमयोद्भाव्यपरीक्षितोसिऋषिप्रभावान्मयिनां
 तकोपिप्रभुःप्रहर्त्तुंकिमुतान्यहिंस्राः ६२ भक्त्यागुरौमय्यनुकंपयाचप्रीतास्मिते
वत्सवरंवृणीष्व नकेवलानांपयसांप्रसूतिमवेहिमांकामदुघांप्रसन्नां ६३
ततःसमानीयसमानितार्थीहस्तौस्वहस्तार्जितवीरशब्दः वंशस्यकर्त्तारमनं
तकीर्त्तिंसुदक्षिणायांतनयंययाचे ६४ संतानकामायतथेतिकामंराज्ञेप्र
तिश्रुत्यपयस्विनीसा दुग्ध्वापयःपत्रपुटेमदीयंपुत्रोपभुंक्ष्वेतितमादिदेश ६५
वत्सस्यहोमार्थविधेश्चशेषमृषेरनुज्ञामधिगम्यमातः ऊधस्यमिच्छामितवो

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

पभोक्तुं षष्ठांसमुर्व्याऽइवरक्षितायाः ६६ इत्थं क्षितीशेन वसिष्ठधेनुर्विज्ञापिता
प्रीततरा बभूव तदन्विता हैमवताच्च कुक्षेः प्रत्याययावाश्रममश्रमेण ६७
तस्याः प्रसन्नेंदुमुखः प्रसादं गुरुर्नृपाणां गुरवे निवेद्य प्रहर्षचिह्नानु
मि मितं प्रियायै शशंस वाचा पुनरुक्तयेव ६८ स नंदिनीस्तन्यमनिंदितात्मा स
द्वत्सलो वत्सहुतावशेषं पपौ वसिष्ठेन कृताभ्यनुज्ञः शुभ्रं यशो मूर्त्तमिवा
धि तितृष्णः ६९ प्रातर्यथोक्तव्रतपारणांते प्रास्थानिकं स्वस्त्ययनं प्रयुज्य
तौ दंपती स्वां प्रति राजधानीं संप्रेषयामास वशी वसिष्ठः ७० प्रदक्षिणी

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

रघु० को० कृत्यहुतंहुताशमनंतरंभर्तुररुंधतींच्च धेनुंसवत्सांचनृपः प्रतस्थे
१६ सन्मंगलोदग्रतरप्रभावः ७१ श्रोत्राभिरामध्वनिनारथेनसधर्मपत्नी
सहितः सहिष्णुः ययावनुद्घातसुखेनमार्गं स्वेनेवपूर्णेनमनोरथेन ७२
तमाहितौत्सुक्यमदर्शनेनप्रजाः प्रजार्थव्रतकर्शितांगं नेत्रैः पपुस्तृप्तिमना
नु प्नुवद्भिर्नवोदयंनाथमिवौषधीनां ७३ पुरंदरश्रीः पुरमुत्पताकंप्रविश्यपौरैर
भिनंद्यमानः भुजेभुजंगेन्द्रसमानसारेभूयः सभूमेर्धुरमाससंज ७५ अथनय
नसमुत्थंज्योतिरत्रेरिवद्यौः सुरसरिदिवतेजोवह्निनिष्ठ्यूतमैशं श्री

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

नरपतिकुलभूत्यैगर्भमाधत्तराज्ञीगुरुभिरभिनिविष्टंलोकपालानुभावैः

७५ इतिश्रीरघुवंशेमहाकाव्येवरप्रदानोनामद्वितीयसर्गः २॥ अथे

प्सितंभर्त्तुरुपस्थितोदयंसखीजनोद्वीक्षणकौमुदीमुखं । निदानमिक्ष्वा

कुकुलस्यसंततेःसुदक्षिणादौहृदलक्षणंदधौ १ ततोविशांपत्युरनन्य

संततेःमनोरथंकिंचिदिवोद्दयोन्मुखं अनन्यसौहार्द्दरस्यदौहृदंप्रिया

प्रपेदेप्रकृतिप्रियंवदा। २ मुखेनसाकेतकपत्रपांडुनाकृशांगयष्टिःप

रिमेयभूषणा स्थिताल्पतारांकरुणेंडुमंडलांविभातकल्पांरजनींव्यडंब

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

ले

रघुवं० पदृ ३ शरीरसादादसमग्रभूषणामुखेनसालक्ष्यतलोध्रपांडुना।तनुप्रकाशे

१७ नविचेयतारकाप्रभातकल्पाशशिनेवसर्वरी ४ पाठांतरं तदाननंमृत्सु

रभिक्षितीश्वरोरहस्युपाघ्रायनतृप्तिमाययौ करीवसिक्तंपृषतैःपयोमुचां

शुचिव्यपायेवनराजिपल्वलं ५ दिवंमरुत्वानिवभोक्ष्यतेभुवंदिगंतविश्रां

तरथोहितत्सुतः अतोभिलाषेप्रथमंतथाविधेमनोबबंधान्यरसान्विलं

घ्यसा ६ नमेह्रियाशंसतिकिंचिदीप्सितंस्पृहावतीवस्तुषुकेषुमागधी

किं हे इतिस्मपृच्छत्यनुवेलमादृतःप्रियासखीरुत्तरकोशलेश्वरः ७ उपेत्यसा १७

नृ

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

दोहददुखशीलतांयदेववव्रेतदपश्यदाहृतं नहीष्टमस्यत्रिदिवेपिभूप
तेरभूदनासाद्यमधिज्यधन्वनः ८ दिनेषुगच्छत्सुनितांतपीवरंतदीयमा
नीलमुखंस्तनद्वयं तिरश्चकारभ्रमराभिलीनयोःसुजातयोःपंकजको
शयोःश्रियं ९ क्रमेणनिस्तीर्यचदोहदव्यथांप्रचीयमानावयवारराजसा पु
राणपत्रापगमादनंतरंलतेवसंनद्धमनोज्ञपल्लवा १० निधानगर्भामि
वसागरांबरांशमीमिवाभ्यंतरलीनपावकां नदीमिवांतःसलिलांसर
स्वतींनृपःससत्वांमहिषीममन्यत ११ प्रियानुरागस्यमनःसमुन्नतेर्भु

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

जार्जितानां च दिगंतसंपदां यथाक्रमं पुंसवनादिकाः क्रिया धृतेश्च धीरः
सदृशीर्व्यधत्त सः १२ सुरेंद्रमात्राश्रितगर्भगौरवात्प्रयत्नमुक्तासनया गृ
हागतः तयोपचारांजलिखिन्नहस्तया ननंद पारिप्लवनेत्रया नृपः १३ कु
मारभृत्याकुशलैरधिष्ठिते भिषग्भिराप्तैरथ गर्भभर्मणि पतिः प्रतीतः प्र
सवोन्मुखीं प्रियां ददर्श काले दिवमभ्रितामिव १४ ग्रहैस्ततः पंचभिरु
च्चसंश्रयैरसूर्यगैः सूचितभाग्यसंपदं असूत पुत्रं समये शचीसमा त्रिसा
धनोत्रशक्तिरिवार्थमक्षयं १५ दिशः प्रसेदुर्मरुतो ववुः सुखाः प्रदक्षिणा

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

इत्यं

र्हिर्ड्डातिमन्निराददे वपुःप्रसैश्शुभत्वांसितद्दृगणेभवोहिलोकमभ्युदयायता

हृद्यां २६ अरिष्टशय्यांपरितोविसारिणासुजन्मनस्तस्यनिजेनतेजसा

निशीथदीपाःसहसाहतत्विषोवभूवुरालेख्यसमर्पिताइव २७ जनायशु

द्धांतचरायशंसतेकुमारजन्मामृतसंमिताक्षरं अदेयमासीत्त्रयमेवभूपतेः

शशिप्रभंछत्रमुभेचचामरे २८ समीहितंप्राप्यचिरान्मुखंपितानिधानकुंभ

स्ययुवेवदुर्गतः मुदाशरीरेप्रबभूवनात्मनःपयोधरेंदूदयमूर्छितोयथा

२९ निवातपद्मस्तिमितेनचक्षुषानृपस्यकांतंपिबतःसुताननं महोदधेः

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

रघुवंश०
१९

पूर इवेंदुदर्शनाद्गुरुः प्रहर्षः प्रबभूव नात्मनि २० सजातकर्मण्यखिलेतप
स्विना तपोवनादेत्य पुरोधसा कृते दिलीपसूनुर्मणिराकरोद्भवः प्रयुक्त
संस्कार इवाधिकं बभौ २१ सुखश्रवा मंगलतूर्यनिस्वनाः प्रमोदनृत्तैः
सह वारयोषितां नकेवलं सद्मनि मागधीपतेः पथि व्यजृंभंत दिवौकसां
मपि २२ नसंयतस्तस्य बभूव रक्षितुर्विसर्जयेद्यं सुतजन्महर्षितः ऋणा
भिधानात्स्वयमेव केवलं तदा पितॄणां मुमुचे स बंधनात् २३ श्रुतस्य या
यादयमंतमर्भकस्तथा परेषां युधि चेति पार्थिवः अवेक्ष्य धातोर्गमनार्थ १९

केवलः कृत्स्न एके
ष्व केवलश्चावधारणे इति
राजस्थातः

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मर्थविवेककारनाम्नो रघुमात्मसंभवं २५ पितुः प्रयत्नात्स समग्रसंपदः शुभैः
शरीरावयवैर्दिने दिने पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचं
द्रमाः २५ उमावृषांकौ सरजन्मना यथा यथा जयंतेन शचीपुरंदरौ तथा
नृपः सा च सुतेन मागधी ननंदतुस्तत्सदृशेन तत्समौ २६ रथांगनाम्नोरि
व भावबंधनं बभूव यत्प्रेम परस्पराश्रयं विभक्तमप्येकसुतेन तत्तयोः
प परस्परस्योपरि पर्यचीयत २७ उवाच धात्र्या प्रथमोदितं वचो ययौ तदी
यामवलंब्य चांगुलिं अभूच्च नम्रः प्रणिपातशिक्षया पितुर्मुदं तेन ततान सो

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

तातसः २८ तमंकमारोप्यशरीरयोगजैः सुखैर्निषिंचंतमिवामृतंत्वचि उ
पांतसंमीलितलोचनोनृपः चिरात्सुतस्पर्शरसज्ञतांययौ २९ अमंस्त
चानेनपरार्घ्यजन्मना स्थितेरभेत्तास्थितिमंतमन्वयं स्वमूर्त्तिभेदेनगुणा
ग्र्यवर्त्तिनापतिःप्रजानामिवसर्गमात्मनः ३० सवृत्तचूलश्चलकाकपक्ष
कैरमात्यपुत्रैः सवयोभिरन्वितः लिपेर्यथावद्ग्रहणेनवाङ्मयं नदीमुखे
नेवसमुद्रमाविशत् ३१ अथोपनीतंविधिवद्विपश्चितोविनिन्युरेनंगुर
वोगुरुप्रियं अवंध्ययत्नाश्चबभूवुरत्रते क्रियाहिवस्तूपहिताप्रसीदति ३२

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

धियः समग्रैः सगुणैरुदारधीः क्रमाच्चतस्रश्चतुरर्णवोपमाः ततार विद्याः
पवनातिपातिभिर्दिशो हरिद्भिर्हरितामिवेश्वरः ३३ त्वचं स मेध्यां परिधाय रौ
रवीमशिक्षतास्त्रं पितुरेव मंत्रवित् न केवलं तद्गुरुरेकपार्थिवः क्षितावभूदे
कधनुर्धरोपि सः ३४ महोक्षतां वत्सतरः स्पृशन्निव द्विपेंद्रभावं कलभः श्र
यन्निव रघुः क्रमाद्यौवनभिन्नशैशवः पुपोष गांभीर्यमनोहरं वपुः ३५ अ
थास्य गोदानविधेरनंतरं विवाहदीक्षां निरवर्त्तयद्गुरुः नरेंद्रकन्यास्तमवाप्य
सत्पतिं तमोपहं दक्षसुता इवाबभुः ३६ युवा युगव्यायतबाहुरंसलः क

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

या

रघुवंश॰ पाटवक्षाः परिणद्धकंधरः वपुःप्रकर्षादजयद्गुरुंरघुस्तथापिनीचैर्विनयाद्द

२१ दृश्यत ३७ ततः प्रजानांचिरमात्मनाधृतांनितांतगुर्वींलघयिष्यताधुरं

निसर्गसंस्कारविनीतइत्यसौनृपेणचक्रेयुवराजशब्दभाक् ३८ नरेंद्रमूला

यतनादनंतरंतदास्पदंश्रीर्युवराजसंज्ञितं ॰ अगाच्छदंशेनगुणाभिलाषिणी

नवावतारंकमलादिवोत्पलं ३९ विभावसुःसारथिनेववायुनाघनव्यपा

येनगभस्तिमानिव वभूवतेनातितरांसुदुःसहः कटप्रभेदेनकरीवपार्थि

वः ४० नियुज्यतंहोमतुरंगरक्षणेधनुर्धरंराजसुतैरनुद्रुतं ॰ अपूर्णमेकेनशत २१

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

क्रतूपमैः शतंक्रतूनामपविघ्नमाप सः ४१ अतः परंतेनमखाययज्वनांतुर

गमुत्सृष्टमनर्गलंपुनः धनुर्भृतामग्रतएवरक्षितांजहारशक्रः किल

गूढविग्रहः ४२ विषादलुप्तप्रतिपत्तिविस्मितंकुमारसैन्यंसपदिस्थितंच

तत् वसिष्ठधेनुश्चयदृच्छयागताश्रुतप्रभावाददृशेऽथनंदिनी ४३ तदंगनि

स्यंदजलेनलोचनेप्रमृज्यपुण्येनपुरस्कृतः सतां अतींद्रियेष्वप्युपपन्नदर्शनो

बभूवभावेषुदिलीपनंदनः ४४ सपूर्वतः पर्वतपक्षशातनंददर्शदेवंनर

देवसंभवः पुनः पुनः सूतनिषिद्धचापलंहरंतमश्वंरथरश्मिसंयतं ४५

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

शतैस्तम[illegible]मनिमेषवृत्तिभिः हरिंचविदित्वाहरिभिश्चवाजिभिः॥ अवो
चदेनंगगनस्पृशारघुःस्वरेणधीरेणनिवर्तयन्निव ४६ मखांशभाजांप्रथमो
मनीषिभिःत्वमेवदेवेंद्रसदानिगद्यसे॥ अजस्रदीक्षाप्रयतस्यमद्गुरोःक्रिया
विघातायकथंप्रवर्तसे ४७ त्रिलोकनाथेनसदामखद्विषस्त्वयानियम्या
ननुदिव्यचक्षुषा सचेत्स्वयंकर्मसुधर्मचारिणांत्वमंतरायोभवसिच्युतो
विधिः ४८ तदंगमग्र्यंमघवन्महाक्रतोरमुंतुरंगंप्रतिमोक्तुमर्हसि पथःश्रु
तेर्द्दर्शयितारईश्वरामलीमसामाददतेनपद्धतिं ४९ इतिप्रगल्भंरघुणासमी

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

रितंवचोनिशम्यमघाधिपतिर्दिवौकसां निवर्त्तयामासरथंसविस्मयः प्रचक्रमेच
प्रतिवक्तुमुत्तरं ५० यदात्थराजन्यकुमारतत्तथायशस्तुरक्ष्यंपरतोयशोधनैः
जगत्प्रकाशंतदशेषमिज्ययाभवद्गुरुर्लंघयितुंममोद्यतः ५१ हरिर्यथैकःपुरु
षोत्तमःस्मृतःमहेश्वरस्त्र्यंबकएवनापरः तथाविदुर्मांमुनयःशतक्रतुंद्वितीयगा
मीनहिशब्दएषनः ५२ अतोयमश्वःकपिलानुकारिणापितुस्त्वदीयस्यमया
पहारितः अलंप्रयत्नेनतवात्रमानिधाःपदंपदव्यांसगरस्यसंततेः ५३ ततः
प्रहस्यापभयःपुरंदरंपुनर्बभाषेतुरगस्यरक्षिता गृहाणशस्त्रंयदिसर्गएषते

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

रघुवंश०
२२

नखल्वनिर्जित्यरघुंकृतीभवान् ५४ सएवमुक्त्वामघवंतमुन्मुखः करिष्यमा
णःसशरंशरासनं अतिष्ठदालीढविशेषशोभिना वपुःप्रकर्षेणविडंबि
तेश्वरः ५५ रघोरवष्टंभमयेनपत्रिणा हृदिक्षतोगोत्रभिदप्यमर्षणः नवां
बुदानीकमुहूर्तलांछने धनुष्यमोघंसमधत्तमार्गणं ५६ दिलीपसूनोःस
बृहद्भुजांतरंप्रविश्यभीमासुरशोणितोचितः पपावनास्वादितपूर्वमाशुगः
कुतूहलेनेवमनुष्यशोणितं ५७ हरेःकुमारोपिकुमारविक्रमः सुरद्वि
पास्फालनकर्कशांगुलौ भुजेशचीपत्रविशेषकांकिते स्वनामचिह्नंनिच २२

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

खानेशायकं ५८ जहारचान्येनमयूरपत्रिणाशरेणंशक्रस्यमहाशनिध्वजं
चुकोपतस्मैसभृशंसुरश्रियः प्रसह्यकेशव्यपरोपणादिव ५९ तयोरुपां
तस्थितसिद्धसैनिकं गरुत्मदाशीविषभीमदर्शनैः वभूवयुद्धंतुमुलंजयैषि
णोरधोमुखैरूर्द्धमुखैश्चपत्रिभिः ६० अतिप्रबंधप्रहिताश्ववृष्टिभिः तमाश्र
यंदुःप्रहस्यतेजसः शशाकनिर्वापयितुंनवासवः स्वतश्च्युतंवह्निमिवाद्भि
रंवुदः ६१ ततःप्रकोष्ठेहरिचंदनांकितेप्रमथ्यमानार्णवधीरनादिनीं रघुः
शशांकार्द्धमुखेनपत्रिणाशरासनज्यामलुनाद्विडौजसः ६२ संचापमुत्सृ

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

ज्यविरूढमत्सरः प्रणाशनाय प्रवलस्य विद्विषः महीध्रपक्षव्यपरोपणोचितं
स्फुरत्प्रभामंडलमस्त्रमाददे ६३ रघुर्भृशं वक्षसि तेन ताडितः पपात भूमौ सह
सैनिकाश्रुभिः निमेषमात्रादवधूय तद्व्यथां सहोत्थितः सैनिकहर्षनिस्वनैः
६४ तथापि शस्त्रव्यवहारनिष्ठुरे विपक्षभावे स्थिरमस्य तस्थुषः तुतोष वी
र्यातिशयेन वृत्रहा पदं हि सर्वत्र गुणैर्निधीयते ६५ असंगमद्रीष्वपि सारव
त्तया न मे त्वदन्येन विसोढमायुधं अवेहि मां प्रीतमृते तुरंगमात् वरं वृणी
ष्वेति तमाह वृत्रहा ६६ ततो निषंगादसमग्रमाहृतं सुवर्णपुंखद्युतिरंजि २४

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

सांगुलिं नरेंद्रसूनुः प्रतिसंहरन्निषुं प्रियंवदः प्रत्यवदत्सुरेश्वरं ६७ ॥ अमोच्य
मश्वं यदि मन्यसे प्रभोः ततः समाप्ते विधिनैव कर्मणि ॥ अजस्रदीक्षाप्रयतः स
मद्गुरुः क्रतोरशेषेण फलेन युज्यतां ६८ यथा च वृत्तांतमिमं सदोगतः त्रिलो
चनैकांशतया दुरासदः तवैव संदेशहराद्विशांपतिः शृणोति देवेश तथा
विधीयतां ६९ तथेति कामं प्रतिशुश्रुवान्रघोर्यथागतं मातलिसारथि
र्ययौ नृपस्य नातिप्रमनाः सदोगृहं सुदक्षिणासूनुरपि न्यवर्त्तत ७० तम
भ्यनंदत्प्रथमं प्रबोधितः प्रजेश्वरः शासनहारिणा हरेः परामृसन्हर्षचले

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

नपाणिनातदीयमंगंकुलिशव्रणांकितं ७१ इतिक्षितीशोनवतिंनवाधि
कांमहाक्रतूनांमहनीयशासनः समारुरुक्षोर्दिवमायुषक्षयेततानसोपान
परंपरामिव ७२ अथसविषयव्यावृत्तात्मायथाविधिसूनवेनृपतिककु
दंदत्वायूनेसितातपवारणंमुनिवनतरुछायांदेव्यातयासहशिश्रियेगलि
तवयसामिक्ष्वाकूणामिदंहिकुलव्रतं ७३ इतिश्रीरघुवंशेमहाकाव्ये
रघुराज्याभिषेकोनामतृतीयसर्गः ३ सराज्यंगुरुणादत्तंप्रतिपद्या
धिकंबभौदिनांतेनिहितंतेजःसवित्रेवहुताशनः १ न्यस्तंज्ञात्वादिलीपं

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

चतंचकृच्छ्रंवसुधांप्रसूतं राज्ञामुद्धृतनाराचेहृदिव्याल्पमिवार्पितं २ दिलीपा
नंतरंराज्येतंनिशम्यप्रतिष्ठितं पूर्वंप्रधूमितोराज्ञांहृदयेग्निरिवोत्थितः
३ पाठांतरे पुरुहूतध्वजस्येवतस्योन्नयनपंक्तयः नवाभ्युत्थानदर्शिन्यो
ननंदुःसप्रजाःप्रजाः ४ सममेवसमाक्रांतंद्वयंद्विरदगामिना तेनसिंहास
नंपित्र्यमखिलंचारिमंडलं ५ छायामंडललक्ष्येणतमदृश्याकिलस्वयं प (संभावनायां)
द्मापद्मातपत्रेणभेजेसाम्राज्यदीक्षितं ६ परिकल्पितसांनिध्याकालेका
लेचवंदिषु स्तुत्यंस्तुतिभिरर्थ्याभिरुपतस्थेसरस्वती ७ मनुप्रभृतिभि

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

रघुवंश ४० २६

मौन्यैर्भुक्तापयपार्थिराजभिः तथाप्यनन्यपूर्वेव तस्मिन्नासीद्वसुंधरा ८ स हि
सर्वस्य लोकस्य युक्तदंडतया मनः आददे नातितीक्ष्णो न मृदुर्मध्यमं स्थितो दक्षि
णः ९ कामं कर्णांतविश्रांते विशाले तस्य लोचने चक्षुष्मत्ता तु शास्त्रेण सू
क्ष्मकार्यार्थदर्शिता १० यथा प्रह्लादनाच्चंद्रः प्रतापात्तपनो यथा तथैव
सोभूदन्वर्थो राजा प्रकृतिरंजनात् ११ नयविद्भिर्नवे राज्ञि सदसच्चोप
दर्शितं पूर्व एवाभवत्पक्षस्तस्मिन्नाभवदुत्तरः १२ मंदोत्कंठाः कृतास्तेन
गुणाधिकतया गुरौ फलेन सहकारस्य पुष्पोद्गम इव प्रजाः १३ पंचनि २६

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मपि श्रुतानामुत्कर्षं पुपुषुर्गुणाः नचैतस्मिन्महीपाले सर्वेन चमिवाभवत्
१४ लब्धप्रशमनस्वस्थमथैनं समुपस्थिता पार्थिवश्रीर्द्वितीयेव शरत्पंकज
लक्षणा १५ निर्वृष्टलघुभिर्मेघैर्मुक्तवर्त्मा सुदुःसहः प्रतापस्तस्य भानोश्च यु
गपद्व्यानशे दिशः १६ वार्षिकं संजहारेन्द्रो धनुर्जैत्रं रघुर्दधौ प्रजार्थसाधने तौ
हि पर्यायोद्यतकार्मुकौ १७ प्रधिज्यमायुधं कर्तुं समयोयं रघोरिति स्वं धनुः
शंकितेनेव संजह्रे शतमन्युना १८ पुंडरीकातपत्रस्तं विकसत्काशचामरः
ऋतुर्विडंबयामास न पुनः प्राप तच्छ्रियं १९ प्रसादसुमुखे तस्मिंश्चन्द्रे च वि

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

सद्वृभैः तदेम्यवस्तुष्मेतां श्रीर्विरासीत्समरसाह्वयो: १९ हंसश्रेणीषु तारासु कु
मद्वत्सु च वारिषु विभूतयस्तदीयानां पर्यस्ता यशसामिव २० इक्षुछाया
निषादिन्यस्तस्य गोप्तुर्गुणोदयं आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः
२१ तस्य गोप्तुर्द्विरेफाणां कर्णोत्पलनिपातिनां स्वरसंवादिभिः कंठैः शालि
गोप्यो जगुर्यशः २२ पाठांतरे प्रससादोदयादंभः कुंभयोनेर्महौजसः रघो
रभिभवाशंकि चुक्षुभे द्विषतां मनः २३ मदोदग्राः ककुद्मंतः सरितां
कूलमुद्रुजाः लीलाखेलमनुप्रापुर्महोक्षास्तस्य विक्रमं २४ प्रसवैः सप्त

अभिभवं आशंकते तत्

कुमारकथा मर्यादिकृते उद्धृते

एकांतिदेती

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

सुप्रतरप्रसेनकु

णानां मदगंधिभिराहृताः असूययेव तन्नागाः सप्तधैव प्रसुस्रुवुः २५ सरि
तः कुर्वती गाधाः पथश्चाश्यानकर्दमान् यात्रायै नोदयामास तं शक्तेः प्रथ
मं शरत् २६ तस्मै सम्यक्हुतो वह्निर्वाजिनीराजनाविधौ प्रदक्षिणा
र्चिर्व्याजेन हस्तेनेव जयं ददौ २७ स गुप्तमूलप्रत्यंतः शुद्धपार्ष्णिरयान्वि
तः षड्विधं बलमादाय प्रतस्थे दिग्जिगीषया २८ अवाकिरन्वयोवृद्धास्तं
लाजैः पौरयोषितः पृषतैर्मंदरोद्धूतैः क्षीरोर्मय इवाच्युतं २९ स ययौ प्रथ
मं प्राचीं तुल्यः प्राचीनबर्हिषा अहितानानिलोद्धूतैस्तर्जयन्निव केतुभिः ३०

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

रघुवंश०
२८

रजोभिः स्यंदनोद्धूतैर्गजैश्च घनसंनिभैः भुवस्तलमिव व्योमं कुर्वन् व्योमेव भू
तलं ३१ पुष्मं मरुपृष्ठान्युदंभांसि नाव्याः सुप्रतरा नदीः विपिनानि प्रकाशानि
शक्तिमत्वाच्चकार सः ३२ प्रतापोग्रे ततः शब्दः परागस्तदनंतरं ययौ पश्चाद्र
थानीकं चतुःस्कंधेव सा चमूः ३३ परागैः कलुषांस्तस्य सह प्रस्थायिभिः कृशान्
पश्चात्प्रयायिभिः पंकाच्छाश्चक्रिरे मार्गनिम्नगाः ३४ स सेनां महतीं कर्षन् पूर्व
सागरगामिनीं बभौ हरजटाभ्रष्टां गंगामिव भगीरथः ३५ त्याजितैः फलमु
त्खातैर्भग्नैश्च बहुधा नृपैः तस्यासीदुल्बणो मार्गः पादपैरिव दंतिनः ३६ २८

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

पौरस्त्यानेवमाक्रामंस्तांस्तान्जनपदान्जयी प्रापतालीवनश्याममुपकं
ठंमहोदधेः ३७ अनम्राणांसमुद्धर्तुस्तस्मात्सिंधुरयादिव आत्मासंरक्षि
र॰३ तः सुह्मैर्वृत्तिमाश्रित्यवैतसीं ३८ वंगानुत्खायतरसानेतानौसाधनोद्यतान्
निचखानजयस्तंभान्गंगास्रोतोंतरेषुसः ३९ आपादपद्मप्रणताः कलमा
इवतेरघुं फलैः संवर्द्धयामासुरुत्खातप्रतिरोपिताः ४० सतीर्त्वाकपिशां
सैन्यैर्बद्धद्विरदसेतुभिः उत्कलादर्शितपथः कलिंगाभिमुखोययौ ४१ स
प्रतापंमहेंद्रस्यमूर्ध्नितीक्ष्णंन्यवेशयत् अंकुशंद्विरदस्येवयंतागंभीरवेदिनः ४२

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

रघुवंश० प्रतिजग्राहकालिंगस्तमस्त्रैर्गजसाधनः पक्षच्छेदोद्यतंशक्रंशिलावर्षीव
२९ स्व पर्वतः ४३ द्विषांविषह्यकाकुत्स्थस्तत्रनाराचदुर्दिनं सन्मंगलस्नातइवप्रति
मु पेदेजयश्रियं ४४ वायव्यास्त्रविनिर्धूतात्पक्षाविद्धान्महोदधेः गजानीका
त्सकालिंगंतार्क्ष्यःसर्पमिवाददे ४५ तांबूलीनांदलैस्तत्ररचितापानभूम
यः नालिकेरासवंयोधाःशात्रवंचयपुर्यशः ४६ गृहीतप्रतिमुक्तस्यसध
र्मविजयीनृपः श्रियंमहेन्द्रनाथस्यजहारनतुमेदिनीं ४७ ततोवेलातटेनै
वफलवत्पूगमालिना अगस्त्याचरितामाशामनाशास्यजयोययौ ४८ २९

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

ससैन्यपरिभोगेनगजदानसुगंधिना कावेरींसरितांपत्युःशंकनीयामिवाक
रोत् ४९ भयोत्सृष्टविभूषाणांतेनकेरलयोषितां अलकेषुचमूरेणुश्चूर्ण
प्रतिनिधीकृतः ५० बलैरध्युषितास्तस्यविजिगीषोर्गताध्वनः मारीचोद्भ्रांत
हारीतामलयाद्रेरुपत्यकाः ५१ ससंजुरश्वक्षुण्णानामेलानामुत्पतिष्णवः
तुल्यगंधिषुमत्तेभकटेषुफलरेणवः ५२ भोगिवेष्टनमार्गेषुचंदनानांसम
र्पितं नास्रंसत्करिणांग्रैवंत्रिपदीच्छेदिनामपि ५३ दिशिमंदायतेतेजोदक्षि
णस्यांरवेरपि तस्यामेवरघोःपांड्याःप्रतापंनविषेहिरे ५४ ताम्रपर्णी

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

रघुवंश३० समेतस्यमुक्तासारंमहोदधेः तेनिपत्यददुस्तस्मैयशःस्वमिवसंचितं ५५
३० सनिर्विश्ययथाकामंतटेष्वालीनचंदनौ स्तनाविवदिशस्तस्याःशैलौमल स्थितौ
सह्याचल यदर्दुरौ ५६ असह्यविक्रमःसह्यंदूरमुक्तमुदन्वताः नितंबमिवमेदिन्याः स्थितं
स्रस्तांशुकमलंघयत् ५७ युग्मं तस्यानीकैर्विसर्पद्भिरपरांतजयोद्यतैः
रामास्त्रोत्सारितोप्यासीत्सह्यलग्नइवार्णवः ५८ मुरलामारुतोद्धूतमगमत्कै
तकंरजः तद्योधवारवाणानामयत्नपटवासतां ५९ खर्जूरीस्कंधनद्धा
नांमदोद्गारसुगंधिषु कटेषुकरिणांपेतुःपुंनागेभ्यःशिलीमुखाः ६० ॥ ३०

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

वकाशौ किलोदन्वान् रामायाभ्यर्थितो ददौ ॥ अपरान्तमहीपालव्याजेन रघु
२ वे करं ॥६१॥ मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणं ॥ त्रिकूटमेव तत्रोच्चैर्जयस्त
म्भं चकार सः ॥६२॥ अभ्यभूयत वाहानां चरतां गात्रसिंजितैः ॥ मर्मरैः पवनोद्भूत
राजतालीवनध्वनिः ॥६३॥ पारसीकांस्ततो जेतुं प्रतस्थे स्थलवर्त्मना ॥ इंद्रिया
ख्यानिव रिपूंस्तत्वज्ञानेन संयमी ॥६४॥ यवनीमुखपद्मानां सेहे मधुमदं न सः
बालातपमिवाब्जानामकालजलदोदयः ॥६५॥ संग्रामस्तुमुलस्तस्य पाश्चा
त्यैरश्वसाधनैः ॥ सार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्यभूत् ॥६६॥ भल्लापव

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

रघुवंश० र्जितैस्तेषां शिरोभिस्स्मश्रुलैर्महीं तस्तारसरघाव्याप्तैः सक्षौद्रपटलैरिव ६७
३१ अपनीतशिरस्त्राणाः शेषास्तं शरणं ययुः प्रणिपातप्रतीकारः संरंभो हि महा
त्मनां ६८ विनयंते स्म तद्योधा मधुभिर्विजयश्रमं आस्तीर्णाजिनरत्नासु द्रा
क्षावलयभूमिषु ६९ ततः प्रतस्थे कौबेरीं भास्वानिव रघुर्दिशं शरैरुस्रैरि
वोदीच्यानुद्धरिष्यन्रसानिव ७० जितान्जप्यास्तानेचक्रत्वारथ्यपरः सरान्
महार्णवमिवौर्वाग्निः प्रविवेशोत्तरापथं ७१ विनीताध्वश्रमास्तस्य सिंधु
तीरविचेष्टनैः दुधुवुर्वाजिनं स्कंधान्लग्नकुंकुमकेसरान् ७२ कांबो ३१

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

जाः समरे सोढुं तस्य वीर्य्यमनीश्वराः गजालानपरिक्लिष्टैरक्षोटैः सार्द्धमा
नताः ७३ तत्र हूणावरोधानां भर्त्तृषु व्यक्तविक्रमं कपोलपाटनादेशि
बभूव रघुचेष्टितं ७४ तेषां सदश्वभूयिष्ठास्तुंगा द्रविणराशयः विविशुस्तं
विश्रांनाथमुदनंतमिवापगाः ७५ ततो गौरीगुरुं शैलमारुरोहाश्वसा
धनः वर्द्धयन्निव तत्कूटानुद्धूतैर्धातुरेणुभिः ७६ शशंस तुल्यसत्वानां सै
न्यघोषेप्यसंभ्रमं गुहाशयानां सिंहानां परिवृत्यावलोकितं ७७ भूर्जेषु
मर्मरीभूताः कीचकध्वनिहेतवः गंगाशीकरिणो मार्गे मरुतस्तं सिषेविरे ७८

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

विशश्रमुर्नमेरूणां छायास्वध्यास्य सैनिकाः । दृषदो वासितोत्संगा निषिण्ण
मृगनाभिभिः ॥ ७९ ॥ सरलासक्तमातंगग्रैवेयस्फुरितत्विषः । आसन्नोषधयो
नेतुर्नक्तमस्नेहदीपिकाः ॥ ८० ॥ तस्योत्सृष्टनिवासेषु कंठरज्जुक्षितत्वचः । ग
जवर्ष्म किरातेभ्यः शशंसुर्देवदारवः ॥ ८१ ॥ तत्र जन्यं रघोर्घोरं पार्वतीयैर्गणै
रभूत् । नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलं ॥ ८२ ॥ शरैरुछिन्नसंकेता
न्स कृत्वा विरतोत्सवान् । जयोदाहरणं बाह्वोर्गापयामास किन्नरान् ॥ ८३ ॥
परस्परेण विज्ञातस्तेषूपायनपाणिषु । राज्ञा हिमवतः सारो राज्ञः सारो हि ३२

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

माञ्जिष्ठ॥ ८४ ॥ तत्राक्षोभ्यं यशोराशिं निवेश्यावरुरोह सः। पौलस्त्यतुलि
तस्याद्रेरादधान इव ह्रियं ॥ ८५ ॥ चकंपे तीर्णलौहित्ये तस्मिन्प्राग्ज्योतिषे
श्वरः। तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः ॥ ८६ ॥ न प्रसेहे स रुद्धार्क
मधारावर्षदुर्दिनं। रथवर्त्मरजोप्यस्य कुत एव पताकिनीं ॥ ८७ ॥ तमीशः
कामरूपाणामत्याखंडलविक्रमं। भेजे भिन्नकटैर्नागैरन्यानुपरुरोध
यैः ॥ ८८ ॥ कामरूपेश्वरस्तस्य हेमपीठाधिदेवतां। रत्नपुष्पोपहारेण छाया
मानर्च पादयोः ॥ ८९ ॥ इति जित्वा दिशो जिष्णुर्न्यवर्तत रथोद्धतं। रजो विश्रा

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

मयन्नराज्ञां छत्रसून्येषु मौलिषु ९० स विश्वजितमाजह्ने यज्ञं सर्वस्वदक्षि
णं आदानं हि विसर्गाय सतां वारिमुचामिव ९१ सत्रान्ते सचिवसखः
पुरस्क्रियाभिर्गुर्वीभिः शमितपराजयव्यलीकान् काकुत्स्थश्चिरविरहो
त्सुकावरोधान् राजन्यान् स्वपुरनिवृत्तयेनुमेने ९३ यज्ञान्ते तमवभृथा
भिषेकपूतं सत्कारैः शमितपराजयव्यलीकाः आमंत्र्योत्सुकवनिता
श्च तद्विसृष्टाः स्वानि स्वान्यपुरवनिभुजः पुराणि जग्मुः ९४ ते रेखाध्वजकु
लिशातपत्रचिह्नं सम्राजश्चरणयुगं प्रसादलभ्यं प्रस्थानप्रणतिभिरं

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

गुलिषुचक्रुर्मौलिस्रक्च्युतमकरंदरेणुगौरं ८८ इति श्रीरघुवंशे
महाकाव्ये कविश्रीकालिदासकृतौ दिग्विजयोनाम चतुर्थसर्गः ४
तमध्वरे विश्वजिति क्षितीशं निःशेषविश्राणितकोषजातं
उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रपेदे वरतंतुशिष्यः १ स मृण्मये
वीतहिरण्मयत्वात् पात्रे निधायार्घ्यमनर्घशीलः श्रुतप्रकाशं यश
साप्रकाशः प्रत्युज्जगामातिथिमातिथेयः २ तमर्चयित्वा विधिवद्विधि
ज्ञस्तपोधनं मानधनाग्रयायी विशांपतिर्विष्टरभाजमारात्कृतांज

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

लिः हत्यविदित्युवाच ३ अप्यग्रणीमंत्रकृतां मृषीणांकुशाग्रबुद्धेकुश
लीगुरुस्ते यतस्त्वयाज्ञानमशेषमाप्तंचैतन्यमुष्णाद्दिवदीधितेन ४ कायेन
वाचामनसाचिसश्वद्यतसंभृतंवासवधैर्यलोपि ॰ आपाद्यतेनव्ययमं
तरायैः कच्चिन्महर्षेस्त्रिविधंतपस्तत् ५ आधारबंधप्रमुखैः प्रयत्नैः
संवर्धिता नांसुतनिर्विशेषंकच्चिन्नवाय्वादिरुपप्लवोवः श्रम
छिदमाश्रमपादपानां ६ क्रियानिमित्तेष्वपिवत्सलत्वादभग्नकामा
मुनिभिः कुशेषुतदंकशय्याच्युतनाभिनालाकच्चिन्मृगीणामनु

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

घाघस्त्ति ७ निवर्त्यतेयैर्नियमाभिषेकोयेभ्योनिवापांजलयःपितॄणां
तान्युंछषष्ठांकितसैकतानिशिवानिवःतीर्थजलानिकच्चित् ८
२ नीवारपाकादिकडंगरीयैरामृश्यतेजानपदैर्नकच्चित् कालोपपन्ना
तिथिकल्प्यभागंवन्यंशरीरस्थितिसाधनंवः ९ अपिप्रसन्नेनमहर्षि
णात्वंसम्यग्विनीयानुमतोगृहाय कालोह्ययंसंक्रमितुंद्वितीयंसर्वो
पकारक्षममाश्रमंते १० तवार्हतोनाभिगमेनतृप्तंमनोनियोगक्रिययो
त्सुकंमे अप्याज्ञयाशासितुरात्मनावाप्राप्तोसिसंभावयितुंवनान्मां ११

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

रघुवंश
३५

स्तस्यार्घपात्रानुमितव्ययस्यरघोरुदारामपिगांनिशम्यस्वार्थोपपत्तिं
प्रतिदुर्बलाशस्तमित्यवोचद्वरतंतुशिष्यः॥१२॥सर्वत्रनोवार्त्तमवेहिराज
न्नाथेकुतस्त्वय्यशुभंप्रजानां।सूर्येतपत्यावरणायदृष्टेःकल्पेतलोक
स्यकथंतमिस्रा॥१३॥भक्तिःप्रतीक्ष्येषुकुलोचितातेपूर्वान्महाभागतया
तिशेषे।व्यतीतकालस्त्वहमभ्युपेतस्त्वामर्थिभावादितिमेविषादः॥
१४ शरीरमात्रेणनरेंद्रतिष्ठन्नाभासितीर्थप्रतिपादितर्द्धिः।आरण्य
कोपात्तफलप्रसूतिःस्तंबेननीवारइवावशिष्टः॥१५॥स्थानेभवाने.३५

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

कनराधिपःसन्नकिंचनत्वंमखजंव्यनक्ति पर्याप्तपीतस्यसुरैर्हि
मांशोःकलाक्षयःश्लाघ्यतरोहिवृद्धेः॥१६॥ तदन्यतस्तावदनन्यकार्यो
गुर्वर्थमाहर्तुमहंयतिष्येस्वस्त्यस्तुतेनिर्गलिताम्बुगर्भंशरद्घनंनार्दति
चातकोऽपि॥१७॥ एतावदुक्त्वाप्रतियातुकामंशिष्यंमहर्षेर्नृपतिर्निषिध्य
किंवस्तुविद्वन्गुरवेप्रदेयंत्वयाकियद्वेतितमन्वयुंक्त॥१८॥ ततोयथाव
द्विहिताध्वरायतस्मैस्मयावेशविवर्जिताय वर्णाश्रमाणांगुरवेसवर्णी
विचक्षणःप्रस्तुतमाचचक्षे॥१९॥ समाप्तविद्येनमयामहर्षिर्विज्ञापितो

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

भूद्गुरुदक्षिणायै समेचिरायास्खलितोपचारांतांभक्तिमेवागणयत्पुर
स्तात् २० निर्वंधसंजातरुषार्थकार्श्यमचिंतयित्वागुरुणाहमुक्तः वि
त्तस्यविद्यापरिसंख्ययामेकोटीश्चतस्रोदशचाहरेति २१ सोहंसपर्या
विधिभाजनेनमत्वाभवंतंप्रभुशब्दशेषं अभ्युत्सहेसंप्रतिनोपरोद्धु
मल्पेतरत्वाच्छ्रुतनिष्क्रयस्य २२ इत्थंद्विजेनद्विजराजकांतिरावेदितो
वेदविदांवरेण एनोनिवृत्तेंद्रियवृत्तिरेनंजगादभूयोजगदेकनाथः
२३ गुर्वर्थमर्थीश्रुतपारदृश्वारघोःसकाशादनवाप्यकामं गतोव

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

॥श्रीरामजी

बाईराधासुबारनुबारामरामबंच
णाघरणमानसेतीअोरकाकीबा
रामरामबंचणाअोरबालुकगी
मणोहोयाकोतेगबारअोलबा
चोसगोहोवाधारनागअोरस
वामीरामनेकुपयाकीचुतनाब
लीकरीज्योचेलनेज्योअोर
स्योलनासीषबारन बकीमान
उनावरनीकुपयाकीकरीदेवो
घणमानसतीअोरदरनार
षणकासमचाअोतातहोसी
कागदलाकलबारको
बाद्यो बांजो

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

॥ श्रीरामकवारतयमाजो।

श्रोरवाइजमनान कागदपुचा
यदेयो श्रीरजमनान राजीकु
सोकासंचार कहदीनायो
श्रोरघारकोजावतोधराराषी
यो श्रीरफागणममश्रोडलो
श्रोररामकुवारकोव्पाकरनो
जकोसमचा[illegible]तीबीदयोकागद
[illegible]समचाराका पा[illegible]देयो।
श्रोरछुतीनरामराम वंचायदीजो
कालुछुनारनरामराम वंचाय
दीजो।
रामराम कुवारजोग
॥ श्रीरामजी [illegible]

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

वधवामरक्षा

CC-0 Uma Raman Jha Collection. Digitized by eGangotri